MSS No. 197 Subject Philosophy

Name of MSS तर्क संग्रह Tarka Sangrāha

Author अन्नभट

Period Folios 6

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios - -

Sans. Ms. 181.4		
T187		तर्कसंग्रह ॥ अन्नम्भट्ट कृत
197-Ms.		७ पत्रक ॥ ला० श० १२ पं० प्र० पृ०
		ह० ल०

Sans. Ms

197

(43)

197

त॰सं १

ॐ श्रीगणेशाय नमः निधाय हृदि विश्वेशं विधाय गुरुवंदनम् बालानां सुखबोधाय
क्रियते तर्कसंग्रहः द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः तत्र द्रव्या
णि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव रूपरसगंधस्पर्शसंख्यापरिमा
णपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वस्नेहद्रवत्वशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रय
त्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमना
निपंचकर्माणि परमपरं चेति द्विविधं सामान्यं नित्यद्रव्यवृत्तयो विशेषास्त्वनंता एव सम
वायस्त्वेक एव अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यंताभावोऽन्योन्याभावश्चेति
गंधवती पृथिवी सा द्विविधा नित्याऽनित्या च नित्या परमाणुरूपा अनित्या कार्यरूपा
पुनस्त्रिविधा शरीरेंद्रियविषयभेदात् शरीरमस्मदादीनां इंद्रियं गंधग्राहकं घ्राणं ना
साग्रवर्ति विषयो मृत्पाषाणादिः शीतस्पर्शवत्य आपः ता द्विविधा नित्या अनित्याश्च नित्याः
परमाणुरूपाः अनित्याः कार्यरूपाः पुनस्त्रिविधाः शरीरेंद्रियविषयभेदात् शरीरं वरुण
लोके इंद्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति विषयाः सरित्समुद्रादिः उष्णस्पर्शवत्तेजः तच्च द्वि

च नित्

विधं नित्यमनित्यं च परमाणुरूपं अनित्यं कार्यरूपं पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात् श

रीरं आदित्यलोके इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति विषयश्चतुर्विधः भौमदिव्यौ

दर्याकरजभेदात् भौमं वह्न्यादिकं अबिन्धनं दिव्यं विद्युदादिः भुक्तस्य परिणामहेतुरौ स्य

दर्य्यं आकरजं सुवर्णादि रूपरहितः स्पर्शवान्वायुः स द्विविधः नित्योऽनित्यश्च नित्यः प

रमाणुरूपः अनित्यः कार्यरूपः पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् शरीरं वायुलो

के इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति विषयो वृक्षादिकम्पहेतुः शरीरान्तःसंचारी न

वायुः प्राणः स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते शब्दगुणमाकाशं तच्चैकं प

विभु नित्यं च अतीतादिव्यवहारहेतुः कालः स चैको विभुर्नित्यश्च प्राच्यादिव्यवहारहेतुर्दि

धि क् सा चैका नित्या विभ्वी च ज्ञानाधिकरणमात्मा स द्विविधः परमात्मा जीवश्च तत्रेश्वरः। विशेष

सर्वज्ञः परमात्मा एक एव जीवः प्रतिशरीरं भिन्नो विभुर्नित्यश्च सुखाद्युपलब्धिसाध

नमिन्द्रियं मनः तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च चक्षुर्मात्रग्राह्यो गुणो रूपं

तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं अभास्वरं शुक्लं जले शुक्लं भा

रमौ पृथिवीजलतेजोवृत्तिः तत्र पृथिव्यां सप्तविधं

१०

त॰सं रूपंतेजसि रसनाग्राह्यो गुणो रसः सच मधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः
२ पृथिवीजलवृत्तिः पृथिव्यां षड्विधः जले मधुर एव घ्राणग्राह्यो गुणो गंधः सच द्विविधः
सुरभिरसुरभिश्च पृथिवीमात्रवृत्तिः त्वगिंद्रियमात्रग्राह्यो गुणः स्पर्शः सच त्रिविधः शीतो॰
ष्णानुष्णाशीतभेदात् पृथिव्यप्तेजोवायुवृत्तिः तत्र शीतो जले उष्णस्तेजसि अनुष्णा
शीतः पृथिवीवाय्वोः रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यंच अन्यत्रापाकजं नित्यम
नित्यंच नित्यगतं नित्यं अनित्यगतमनित्यं एकत्वादिव्यवहारहेतुः संख्या नवद्रव्यवृ
त्तिः एकत्वादिपरार्द्धपर्यंता एकत्वं नित्यगतं नित्यं अनित्यगतमनित्यं द्वित्वादिकं
तु सर्वत्र अनित्यमेव मानव्यवहारासाधारणं कारणं परिमाणं नवद्रव्यवृत्तिः तच्चा॰
तुर्विधम् अणुमहद्दीर्घंह्रस्वंचेति पृथक्व्यवहारअसाधारणंकारणंपृथक्सर्वद्रव्य
वृत्तिः संयुक्तव्यवहारहेतुः संयोगः सर्वद्रव्यवृत्ति संयोगनाशको गुणो विभागः स
र्वद्रव्यवृत्तिः परापरव्यवहारकारणे परत्वापरत्वे ते द्विविधे दिक्कृते कालकृते चेति
दूरस्थे दिक्कृतं परत्वम् समीपस्थे दिक्कृतं अपरत्वम् ज्येष्ठे कालकृतं परत्वम् कनिष्ठे २

साधारण

कालकृतं परत्वम् कनिष्ठे कालकृतमपरत्वम् आद्यपतनासमवायिकारणं
गुरुत्वं पृथिवीजलवृत्तिः आद्य स्यन्दनासमवायिकारणं द्रवत्वम् पृथिव्यप्तेजोवृत्तिः
तद्विविधम् सांसिद्धिकं नैमित्तिकं च सांसिद्धिकं जले नैमित्तिकं पृथिवीतेजसोः
पृथिव्यां घृतादौ अग्निसंयोगजं द्रवत्वं तेजसि सुवर्णादौ चूर्णादिपिण्डीभावहे
तुर्गुणः स्नेहो जलमात्रवृत्तिः श्रोत्रग्राह्यो गुणः शब्दः आकाशमात्रवृत्तिः सद्वि
विधः ध्वन्यात्मको वर्णात्मकश्चेति ध्वन्यात्मको भेर्यादौ वर्णात्मकः संस्कृतभाषा
दिरूपः सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानं सा द्विविधा स्मृतिरनुभवश्च संस्कारजन्यं ज्ञानं स्मृ
तिः तद्भिन्नं ज्ञानमनुभवः स द्विविधः यथार्थोऽयथार्थश्च तद्वति तत्प्रकारकोऽनु
भवो यथार्थः स एव प्रमेत्युच्यते तदभाववति तत्प्रकारकश्चायथार्थः ४ यथार्थानुभव
श्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात् तत्करणमपि चतुर्विधम् प्रत्यक्षानुमा
नोपमानशाब्दभेदात् व्यापारवत् असाधारणं कारणं करणम् अनन्यथासिद्धकार्य
नियतपूर्ववृत्तिकारणं कार्यं प्रागभावप्रतियोगि कारणं त्रिविधम् समवाय्यसमवायि

न ज्ञाते समिता ज्ञात जनकोंशः २

४ यथा शुक्ताविदं रजतमित्यादौ ज्ञानं

निमित्तभेदात् यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् यथा तन्तवः पटस्य पटश्च स्वग
तरूपादेः कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति कारणमसमवायिकारणम् यथा
तन्तुसंयोगः पटस्य तन्तुरूपं पटरूपस्य तदुभयभिन्नं कारणं निमित्तकारणम् यथा तुरीवेमा
दिकं पटस्य तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् अत्र प्रत्यक्षज्ञानक
रणं प्रत्यक्षम् इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं तद्द्विविधं निर्विकल्पकं सविकल्पकं
च तत्र निःप्रकारकं निर्विकल्पकम् किंचिदिदम् सप्रकारकं सविकल्पकम् यथा डित्थो
यं ब्राह्मणोयं श्यामोयमिति प्रत्यक्षज्ञानहेतुरिंद्रियसन्निकर्षः षड्विधः संयोगः संयुक्तस
मवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चे
ति चक्षुषा घटादिप्रत्यक्षजनने संयोगः संनिकर्षः घटरूपप्रत्यक्षे संयुक्तसमवायः चक्षुः
संयुक्ते घटे रूपस्य समवायात् रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः चक्षुःसंयु
क्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् श्रोत्रेण शब्दस्य साक्षात्कारे समवायः सन्निकर्षः
कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् शब्द ३

त्साक्षात्कारे समवेतसमवायः सन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् अभावप्रत्य
क्षे विशेषणविशेष्यभावः सन्निकर्षः घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटा
भावस्य विशेषणत्वात् एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं त
स्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् अनुमितिकरणमनुमानम् परामर्शजन्यं ज्ञानमनुमितिः
व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः
तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमिति यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः ॥
व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता अनुमानं द्विविधम् स्वार्थं परार्थं च स्वार्थं स्वानुमिति
हेतु तथाहि स्वयमेव भूयो दर्शनेन यत्र धूमस्तत्राग्निरिति इति महानसादौ व्याप्तिं गृहीत्वा
पर्वतसमीपं गतः तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र यत्र धूमस्तत्रा
ग्निरिति तदनंतरं वह्निव्याप्यधूमवानयं पर्वतः इति ज्ञानमुत्पद्यते अयमेव लिंगपरामर्श इ
त्युच्यते तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते तदेतत्स्वार्थानुमानं यत्तु
स्वयं धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पंचावयववाक्यं प्रयुंक्ते तत्परार्थानुमानम् यथा

पर्वतो ऽग्निमान्धूमवत्वात् यो यो धूमवान्स सो ऽग्निमान् यथा महानसः तथा चायं तस्मात्त
थेति अनेन प्रतिपादिताल्लिंगात्पर्वतो ऽग्निः प्रतिपद्यते प्रतिज्ञाहेतूदाहरणोपनयनिगमः
नानि पंचावयवाः पर्वतो ऽग्निमानिति प्रतिज्ञा धूमवत्वादिति हेतुः यो यो धूमवान्स इत्यु
दाहरणं तथा चायमित्युपनयः तस्मात्तथेति निगमनं स्वार्थानुमितिपरार्थानु
मित्योर्लिंगपरामर्श एव करणं तस्माल्लिंगपरामर्शो ऽनुमानम् लिंगं त्रिविधं अन्वय
व्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्य
तिरेकि यथा वह्नौ साध्ये धूमवत्वं यत्र धूमस्तत्राग्निरित्यन्वयव्याप्तिः यत्र वह्निर्नास्ति त
त्र धूमोपि नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः अन्वयो व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्र
मेयत्वादभिधेयत्वाच्चेति अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्न व्यतिरे नास्ति
कमात्रव्याप्तिकं केवलव्यतिरेकि यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्वात् यदितरेभ्यो न भि
द्यते न तद्गन्धवत् यथा जलं न चेयं तथा तस्मान्न तथेति यद्गन्धवत्तदितरभिन्नमित्यन्वयदृष्टा
न्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् संदिग्धसाध्यवान्पक्षः यथा धूमवत्वे हेतौ पर्वतः निश्चि ४

अत्र अन्वयमात्रव्याप्तिकं केवलान्वयि यथा घटो ऽभिधेयः
प्रमेयत्वात् पटवदिति

तसाध्यवान्सपक्षः यथा तत्रैव महानसः निश्चितसाध्याभाववान्विपक्षः यथा तत्रैव ह्रदः सव्
यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंचहेत्वाभासाः सव्यभिचारोनैकांतिकः सत्रि
विधः साधारणासाधारणानुपसंहारिभेदात् तत्रसाध्याभाववद्वृत्तिः साधारणोनैकां
तिकः यथा पर्वतोग्निमान्प्रमेयत्वात् प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात्
सर्वसपक्षविपक्षव्यावृत्तोसाधारणः यथा शब्दो नित्यः शब्दत्वादिति शब्दत्वं सर्वेभ्यो नि
त्यःनित्येभ्यो व्यावृत्तं शब्दमात्रवृत्ति अन्वयव्यतिरेकदृष्टांतरहितोनुपसंहारी यथा सर्व
मनित्यं प्रमेयत्वादिति अत्र सर्वस्यापि पक्षत्वाद्दृष्टांतो नास्ति साध्याभावव्याप्तो हेतुर्विरुद्धः
यथा शब्दो नित्यः कृतकत्वात् कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तं साध्याभावसा
धकं हेत्वंतरं यस्य स सत्प्रतिपक्षः यथा शब्दो नित्यः श्रावणत्वात् शब्दोऽनित्यः कार्यत्वात्
घटवदिति असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति आश्रया
सिद्धो यथा गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवदिति अत्र गगनारविंदमाश्र
यः स च नास्त्येव स्वरूपासिद्धो यथा शब्दो गुणः चाक्षुषत्वादिति अत्र चाक्षुषत्वं शब्दे नास्ति शब्द

सद्भावग्रनत्वात् सोपाधिको व्याप्यत्वासिद्धः साध्यव्यापकत्वे सति साधनाऽव्यापक उपाधिः
साध्यसमानाधिकरणात्यन्ताभावाऽप्रतियोगित्वं साध्यव्यापकत्वम् साधनवन्निष्ठात्यन्ता
भावप्रतियोगित्वं साधनाऽव्यापकत्वं पर्वतो धूमवान् वह्नेरित्यत्र आर्द्रेन्धनसंयोग उपाधिः
यत्र धूमस्तत्रार्द्रेन्धनसंयोगः यत्र वह्निस्तत्रआर्द्रेन्धनसंयोग इति नास्ति अयोगोलके आ
र्द्रेन्धनाभावात् एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः सोपा
धिकत्वाद्वह्निमत्वं व्याप्यत्वासिद्धम् यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः।
यथा वह्निरनुष्णः द्रव्यत्वात् इत्यत्र अनुष्णत्वं साध्याभावः उष्णत्वं स्पर्शेन प्रत्यक्षेण गृह्यत इति
बाधितत्वं व्याख्यातमनुमानम् उपमितिकरणमुपमानम् संज्ञासंज्ञिसंबन्धज्ञानमुपमि
तिः तत्करणं सादृश्यज्ञानम् तथाहि कश्चिद्गवयशब्दवाच्यमजानन् कुतश्चिदारण्यकपुरुषात्
गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति तदनन्तरमयं
गवयशब्दवाच्यः इत्युपमितिरुत्पद्यते इत्युपमानं ॥ आप्तवाक्यं शब्दः आप्तस्तु यथा
र्थवक्ता वाक्यं पदसमूहः यथा गामानय दण्डेनेति शक्तं पदं अस्मात्पदादयमर्थो बोद्धव्यः ५

इतिईश्वरसंकेतः शक्तिः आकांक्षायोग्यता सन्निधिश्चवाक्यार्थज्ञानहेतुः पदस्यपदांतरव्य
तिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा अर्थाबाधो योग्यता पदानामविलंबेनोच्चारणं
सन्निधिः आकांक्षादिरहितंवाक्यमप्रमाणम् यथा गौरश्वः पुरुषोहस्तीतिनप्रमाणं आ
कांक्षाविरहात् अग्निनासिंचेदितिनप्रमाणं योग्यताविरहात् प्रहरेप्रहरेअसहोच्चरिता
निगामानयेत्यादिपदानिनप्रमाणंसन्निध्यभावात् वाक्यंद्विविधं वैदिकंलौकिकंच वै
दिकमीश्वरोक्तत्वात् सर्वमेवप्रमाणं लौकिकंत्वाप्तोक्तंप्रमाणं अन्यदप्रमाणं वाक्या
र्थज्ञानंशाब्दज्ञानं तत्करणंशब्दः यथार्थानुभवोनिरूपितः अयथार्थानुभवस्त्रिविधः
संशयविपर्ययतर्कभेदात् एकस्मिन्धर्मिणिविरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानंसं
शयः यथास्थाणुर्वापुरुषोवेति मिथ्याज्ञानंविपर्ययः यथाशुक्काविदंरजतमिति व्या
प्यारोपेणव्यापकारोपस्तर्कः यथायदिवह्निर्नस्यात् तर्हिधूमोपिनस्यादितिस्मृतिरपि॥
द्विविधा यथार्थायथार्था प्रमानोपंदुःखं इच्छाकामः क्रोधोद्वेषः कृतिःप्रयत्नः विहितक
र्मजन्योधर्मः निषिद्धकर्मजन्यस्त्वधर्मः बुद्ध्यादयोष्टावात्ममात्रगुणाः बुद्धीच्छाप्रयत्नानि

त॰सं
९

त्यानित्याश्च नित्या ईश्वरस्य अनित्या जीवस्य संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापक
श्चेति वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः अनुभवजन्यस्मृतिहेतुर्भावना आत्ममात्रवृत्तिः
अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटादिपृथिवीवृत्तिः चलनात्मकंक
र्म ऊर्द्ध्वदेशसंयोगहेतुरुत्क्षेपणं अधोदेशसंयोगहेतुरपक्षेपणं शरीरसन्निकृष्टसंयोगहेतु
राकुंचनं विप्रकृष्टसंयोगहेतुः प्रसारणं अन्यत् सर्वं गमनं नित्यमेकमनेकानुगतं सा
मान्यं द्रव्यगुणकर्मवृत्ति परं सत्तापरं द्रव्यत्वादि नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः नि
त्यः संबंधः समवायः अयुतसिद्धवृत्तिः ययोर्मध्ये एकमपराश्रितमेवावतिष्ठते तावयुतसि
द्धौ अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावंतौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति ।
अनादिः सांतः प्रागभाव उत्पत्तेः पूर्वं कार्यस्य सादिरनंतः प्रध्वंसः उत्पत्त्यनंतरं कार्यस्य त्रै
कालिकसंसर्गावच्छिन्नप्रतियोगिकोऽत्यंताभावः यथा भूतले घटो नास्तीति तादात्म्यसंबं
धावच्छिन्नप्रतियोगिकोऽन्योन्याभावः यथा घटः पटो न भवति सर्वेषामपि पदार्थानां यथा ९
यथमुक्तेष्वेवांतर्भावात्सप्तैव पदार्था इति सिद्धं कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ॥

अन्नंभट्टेनविदुषारचितस्तर्कसंग्रहः ॥ इतितर्कसंग्रहः संपूर्णम् ॥

श्री